# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# वार्षिकपरीक्षा, एप्रिल-२०१६

कक्षा - शास्त्री-३ प्रश्नपत्र-६ गुणाः - १००

विषयः फलितज्यौतिषम् वार्षिक ( बाह्य ) समयः - ०३:०० तः ०६:००

दिनाङ्कः - २३-०४-२०१६ सन्दर्भग्रन्थः सर्वाथचिन्तामणिः/षट्पञ्चाशिका/नरपतिजयचर्या/

---

**प्रश्नः -१** **अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भ व्याख्यात्मकम् उत्तरं लुख्यम् ।** **१६**

*१ धूमोऽर्को विश्वभावाश्रुतिभवनयुतो मण्डलाच्छोधितोऽसौ*
*पातः षड्राशियुक्तः परिधिरथ भसंशोधितश्चापनामा ।*
*शैलाभाभागयुक्तं धनुरथ च शिखी पञ्च ते त्वप्रकाशाः ।*
*प्रादुर्भावे च तेषां फलमिति कथितं जातकप्रश्नयोः स्यात् ॥*

*२ वितश्वरेण सहिते भवराशिनाथे कर्माधिपस्थनवभावपदृष्टियुक्ते ।*
*वैशिषिकांशकयुते परमोच्चभागे योगे बहुत्वधनलाभमिहाहुरार्याः ॥*

*३ कलत्रराशिस्थितजीवदाये दारार्थपुत्रार्थसुखम्प्रयाति ।*
*विदेशयानं समरे जयञ्च ध्यानं परब्रह्माणि पुण्यकर्म ॥*

**प्रश्नः -२** **अधोलिखितेषुः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **०७**

*१. षट्क्लीबयोगाः ।  २ दीर्घायुयोगाः ।*

**प्रश्नः -३** **अधोलिखितेषुः कयोश्चिद् द्वयोः टिप्पणीं लिखतु ।** **१२**

*१ ग्रहाणामुच्चनीचादिकयनम् ।  २ जनन्याः दीर्धयुष्ययोगाः ।*
*३ विविधरोगाणां योगाः ।  ४ अरिष्टभङ्गव्योगः ।*

**प्रश्नः -४** **अधोलिखितेषु केषाञ्चित् पञ्चप्रश्नानाम् अतिलघूतरं लिखन्तु ।** **०५**

*१ सर्वाचिन्तामणिग्रन्थस्यलेखकः कः ?  २ मेष-राशेः स्वामीग्रहः कः ?*
*३ इज्यशब्दस्य अर्थः कः ?  ४ शरीरे मीनराशेः स्थानं कुत्र भवति ?*
*५ द्वादंशाशमानं किम् ?  ६ राशौ कति अंशाः भवन्ति ।*
*७ कति वर्गाः सन्ति ? (कुण्डल्याः)  ८ भौमस्योच्चस्थानं लिखत ।*

**विभागः-२**

**प्रश्नः -५** **अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भव्याख्या कार्या ।** **०८**

*१ यो-यो भावः स्वामिदृष्टोयुतो वा सौम्यैर्वा स्यान्तस्य तस्यास्ति वृद्धिः ।*
*पापेरेवं तस्य भावस्य हानि निर्देष्टव्या पृच्छतां जन्मतो वा ॥*

*२ केन्द्रत्रिकोणेषु शुभान्वितेषु पापेषु केन्द्राष्टभवर्जितेषु ।*
*सर्वार्थसिद्धिं प्रवदेन्नराणां विपर्यस्थेषु विपर्ययः स्यात् ॥*

*३ स्थानप्रदादशसप्तमगाश्च सौम्या मानार्थदाः स्वसुतलग्नगता भवन्ति ।*

*पापा व्ययामसहिताा न शुभप्रदाः स्युर्लग्ने शशी न शुभदो दश्मे शुभश्च ॥*

**प्रश्नः -६** अधोलिखितेषुः **कस्यचित् एकस्य सविस्तरम् उत्तरं लेख्यम् ।** **०७**

*१ हृतनष्टमुष्टिगत चिन्तितानां धातुमूलजीवानां परिज्ञानमाह ।*

*२ जयपराजयाध्यायो व्याख्यायेत तत्र पराजयज्ञानमाह ॥*

**प्रश्नः -७** **अधोलिखितेषुः कयोश्चित द्वयोः टिप्पर्णी लेख्या ।** **१२**

*१ शत्रोर्मार्गनिवृत्तिज्ञानमाह । २ शत्रोर्गमागमज्ञानमाह । ३ लाभाऽलाभज्ञानमाह ।*

*४ वर्षासमये वृष्टिज्ञानमह । ५ प्रश्नकाले वृष्टिज्ञानमाह ।*

**प्रश्नः -८** **अधोलिखितेषु केषाञ्चित् पञ्चानामतिलघूत्तराणि लेख्यानि ।** **०५**

*१ भावानां संख्या का ? २ षट्पञ्चा शिकाग्रन्थस्य लेखकः कः ?*

*३ के स्थिरराशयः ? ४ सौम्यग्रहाः के ?*

*५ मेष-सिंह-धनु-राशिषु चन्द्रः कस्मिन् दिशायां भवति ? ६ शनिग्रहस्य वयः किम् ?*

**विभागः -३**

**प्रश्नः -९** **अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भ व्याख्यां कुरुत ।** **०८**

*१ अव्यक्तमव्यययं शान्तं नितान्तं योगिनां प्रियम् ।*

*सर्वानन्दस्वरूपं यत्तद्वन्दे ब्रह्म - सर्वगम् ॥*

*२ मात्रादिस्वरभेदेन स्वरानुत्पाद्य — नामतः ।*

*योगे शरहृते शेषे योगस्वर इहोच्यते ॥*

*३ यो यस्य पञ्चमेस्थाने स स्वरो मृत्युदायकः ।*

*तृतीये दु भवेद्वृद्धिः शेषा मध्य फलप्रदा ॥*

**प्रश्नः -१०** अधोलिखितयोः **कस्यचित् एकस्य उपरि निबन्धं लिखत ।** **०६**

*१ पञ्चबालाघवस्थानां बलमाह । २ मात्रास्वराध्यायस्य विषयवैशिष्ट्यम् ।*

**प्रश्नः -११** अधोलिखितेषु **कस्यचित् एकस्य उपरि टिप्पर्णी लिखतु ।** **०३**

*१ स्वरशास्त्रस्य प्रधानत्वम् । २ कूमचक्रप्रकरणवैशिष्ट्यम् ।*

**प्रश्नः -१२** अधोलिखितेषु केषाञ्चित् त्रयाणांम् अतिलघूतरं लेख्यानि । **०३**

*१ स्वराणां संख्या का ? २ नरपतिजयचर्याग्रन्थस्य लेखकः कः ?*

*३ अंशचक्रे ऊर्ध्वगा एवं तिर्यग्रेखा संख्या काः ? ४ कूर्मचक्रं निर्मायितु ।*

*५ विद्रुम इति शब्दस्य कोऽर्थः ?*